# Pradoshakaleshivalingapujavarnanam

# પ્રદોષકાલેશિવલિઙ્ગપૂજાવર્ણનમ્

## Document Information

Text title : Pradoshakale shivalingapujavarnanam

File name : pradoShakAleshivalingapUjAvarNanam.itx

Category : shiva, shivarahasya, pUjA

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 4 | 52-82 ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# પ્રદોષકાલેશિવલિઙ્ગપૂજાવર્ણનમ્

બિલ્વૈઃ પુષ્પૈઃ પૂજિતં શાઙ્ગલિઙ્ગં ધૂપૈઃ રત્નૈર્દીપદાનૈરનન્તૈઃ ।
તત્વજ્ઞોઽયં તેન પુણ્યેન ભૂયઃ તસ્માન્નિત્યં પૂજ્ય એવ શિવઃ સ્યાત્ ॥ ૫૨॥

પુણ્યાન્યનન્તાન્યપિ સન્તિ કિં તૈઃ પ્રદોષકાલે શિવપૂજનેન ।
ભવત્યવશ્યં નૃપ તત્વવેત્તા સૌભાગ્યસૌન્દર્યનિધિશ્ચ મર્ત્યઃ ॥ ૫૩॥

કિં કૌતુકં સૃષ્ટમિદં શિવેન દૃષ્ટં પ્રદોષે શિવલિઙ્ગમાત્રમ્ ।
સૂતે સુખાનિ સ્વયમેક એવ નાન્યત્ પરં કિઞ્ચિદપેક્ષિતં ચ ॥ ૫૪॥

પ્રદોષકાલે શિવસમ્મતોઽતઃ પ્રદોષકાલીનશિવાર્ચનેન ।
પ્રયાતિ શૈવં પદમદ્ભુતં તત્ ન જ્ઞાયતે ભૂપ સુરાધિપૈશ્ચ ॥ ૫૫॥

યઃ કોઽપિ સાયં શિવદર્શનેન ભુક્ત્વાઽપિ ભોગાન્ વિપુલાનપારાન્ ।
શિવં પ્રયાત્યેવ વિના પ્રયત્નૈઃ સ યોગિનામપ્યતિદુર્લભો હિ ॥ ૫૬॥

સ યાગવાર્તાં ન કરોતિ શમ્ભુઃ ન યોગવાર્તામપિ દાનવાર્તામ્ ।
પરન્તુ સાયં શિવપૂજકાનાં કરોતિ વાર્તાં ગિરિજાસમેતઃ ॥ ૫૭॥

પ્રદોષકાલે સમુપાગતોઽથ પુષ્પં ગૃહીત્વા કમલં ગૃહીત્વા ।
સ બિલ્વમાદાય જલં ગૃહીત્વા સ ભૂતિમાદાય તિલાક્ષતાનિ ॥ ૫૮॥

સ ધૂપમાદાય સમાગતોઽથ દીપં સમાદાય ફલં ગૃહીત્વા ।
તામ્બૂલમાદાય સ સાયમાદૌ લિઙ્ગાર્ચનાસક્તમતિર્ભવાનિ ॥ ૫૯॥

નિરીક્ષ્યતે તેન મહાપ્રદોષે બિલ્વાર્ચિતં લિઙ્ગમનુત્તમં મે ।
પ્રદક્ષિણં ચ પ્રણતં ચ તેન ધ્યાતં ચ તેન ક્ષણમાસ્તિકેન ॥ ૬૦॥

વિભૂતિપૂતેન વિલોકિતં ચ પુનઃ પુનર્લિઙ્ગમનુસ્મૃતં ચ ।
રુદ્રાક્ષમાલાછવિભૂષણં ચ પુનઃ પુનસ્તત્ પ્રણતં ચ લિઙ્ગમ્ ॥ ૬૧॥

તામ્બૂલમાદાય નિવેદિતં ચ દ્રાક્ષાફલં તેન નિવેદિતં ચ ।
તેનાર્પિતં તત્કદલીફલં ચ પ્રદોષકાલે શિવલિઙ્ગમૂર્ધ્નિ ॥ ૬૨॥

તેનામ્રપક્વોરુફલાનિ તાનિ દત્તાનિ લિઙ્ગોપરિ તેન દત્તમ્ ।
દુકૂલમત્યુજ્વલમાયતં ચ તદેવ તાવદ્વિપુલં મનોજ્ઞમ્ ॥ ૬૩॥

ક્ષીરપ્રવાહૈરભિષિક્તમદ્ય પ્રદોષકાલેષુ દધિપ્રવાહૈઃ ।
ઘૃતપ્રવાહશ્ચ મધુપ્રવાહૈઃ સુશર્કરારાશિભિરર્ચિન્ત ચ ॥ ૬૪॥

મન્દારમાલાસમલઙ્કૃતં ચ લિઙ્ગં મદીયં ઘનચન્દનેન ।
કસ્તૂરિકાકર્દમસંયુતેન પ્રદોષકાલે ખલુ શામ્ભવેન ॥ ૬૫॥

સુશર્કરાસદ્ઘૃતકુમ્ભયુક્તં ક્ષીરાન્નમેતેન નિવેદિતં મે ।
અપૂપરાશિશ્ચ સમર્પિતો મે મહાપ્રદોષે ખલુ શામ્ભવેન ॥ ૬૬॥

અનેન રત્નાભરણાનિ દત્તાન્યનેન દત્તા ખલુ બિલ્વમાલા ।
પ્રદોષકાલે મુહુરાદરેણ સૃષ્ટં ચ લિઙ્ગં મમ આદરેણ ॥ ૬૭॥

અયં હિ હસ્તો ભગવાનયં મે પુણ્યસ્વભાવો ભગવત્તરો મે ।
અયં હિ હસ્તઃ ખલુ વિશ્વભેષજો યસ્માદયં મેઽદ્ય શિવાભિમર્શનઃ ॥ ૬૮॥

અનેન ભુક્તં ન દિવા ભવાનિ જલં ન પીતં ફલભક્ષણં ચ ।
કૃતં ન તામ્બૂલમપિ પ્રદોષે ત્યક્ત્વા શિવારાધનમાદરેણ ॥ ૬૯॥

એતે મદીયાઃ સિતભસ્મપૂતાઃ પ્રદોષકાલે શિવપૂજનાય ।
કૃતપ્રયત્નાઃ શિવનામપૂતાઃ પ્રકૃષ્ટરુદ્રાક્ષવિભૂષિતાઙ્ગાઃ ॥ ૭૦॥

પ્રદોષકાલીનશિવાર્ચનેન ભુક્ત્વૈવ ભોગાન્ વિપુલાનપારાન્ ।
સ્થાસ્યન્તિ સર્વેઽપિ મમૈવ પાર્શ્વે મત્પૂજનં પ્રાપ્ય મહોત્સવાસ્તે ॥ ૭૧॥

એતે વિમાનાનિ મનોહરાણિ પ્રાપ્યાન્તકારાધિતપાદપદ્માઃ ।
વિધીન્દ્રનારાયણપૂજિતાશ્ચ સ્થાસ્યન્તિ મત્પાદનખપ્રભાભિઃ ॥ ૭૨॥

ધન્યાઃ પ્રદોષેષુ શિવાર્ચકાસ્તે સર્વે મમૈવાપરવિગ્રહાસ્તે ।
તેષાં પરં પાદરજો યમોઽપિ ધત્તે શિરસ્યેવ તથૈવ વિષ્ણુઃ ॥ ૭૩॥

પ્રદોષકાલીનશિવાર્ચનાય મતિઃ શિવે સ્યાન્મદનુગ્રહેણ ।
અઘોરસંસારવિકારસાગરે પુનર્ન દુઃખાનિ તયા ભવન્તિ ॥ ૭૪॥

તાવન્મહાપાપભયં ભવાનિ યાવન્ન પૂજાં રજનીમુખેષુ ।
કરોતિ લિઙ્ગે સિતભસ્મવીતત્રિપુણ્ડ્રરુદ્રાક્ષવિભૂષિતઃ સન્ ॥ ૭૫॥

પૂજાં કોઽપિ મહાપ્રદોષસમયે કૃત્વા વિભૂતિ-
પ્રભારુદ્રાક્ષાભરણપ્રભાપરિવૃતો લિઙ્ગે જલૈર્વા ફલૈઃ ।

બિલ્વૈર્વા નવકણ્ટકારિકુસુમૈઃ દૂર્વાઙ્કુરૈર્વા શિવે
ભૂપાલત્વમવાપ્ય મત્પદરજઃપુઞ્જેન સઙ્ક્રીડતિ ॥ ७८॥

કો વા તેન સમઃ પ્રદોષસમયે યેનાહમભ્યર્ચિતો
બિલ્વાનાં ખલુ માલયા જલલવૈઃ શ્રૌતેન વા ભસ્મના ।
ઉત્ફુલ્લૈઃ કરવીરચમ્પકમહામલ્લીપ્રસૂનૈઃ શિવૈઃ
તત્પાદામ્બુજરેણુભિર્મુહુરહો નારાયણઃ પૂજિતઃ ॥ ७७॥

આજન્માખિલકણ્ઠશોષણકરૈઃ કિં વેદપારાયણૈઃ
કિં યાગૈર્ધનધાન્યનાશનકરૈઃ કન્યાપ્રદાનૈરપિ ।
કિઞ્ચોત્તુઙ્ગતુરઙ્ગદન્તિનિકરરાગારપ્રદાનૈઃ શિવે
સાયઙ્કાલશિવાર્ચનાર્જિતફલાભાવે ન મુક્તિર્યતઃ ॥ ७८॥

ક્ષીણા સ્યાત્ તનુરેવ ઘોરતપસા દાનૈર્ધનં નશ્યતિ
વ્યર્થં ચાયુરપિ પ્રયાતિ ગિરિજે લિઙ્ગાર્ચનં તન્ન ચેત્ ।
તેનૈવાખિલભાગ્યભોગવિભવો ભ્રમણ્ડલે જાયતે
પશ્ચાન્મુક્તિમુપૈતિ તેન સદૃશં લિઙ્ગં ન જાને ધ્રુવમ્ ॥ ७૯॥

સ્વર્ગઃ કેવલમઙ્ગજાતસહિતાત્ યાગાત્ સ સવ્યઙ્ગતો
વ્યઙ્ગં લિઙ્ગસમર્ચનં જલલવૈઃ શ્રીબિલ્વચૂર્ણૈઃ કૃતમ્ ।
તેનાપારસુરાર્ચિતેન વિભવૈઃ સ્વર્ગાપવર્ગપ્રદં
લિઙ્ગારાધનમેવ તેન સદૃશો ધર્મો ન લોકત્રયે ॥ ૮૦॥

ચિત્તં યસ્ય ન લિઙ્ગપૂજનરતં તજ્જન્મ તાવદ્ગતં
વ્યર્થં તઞ્જનનીવયસ્તરુવરચ્છેદે કુઠારઃ સ તુ ।
તદ્વાર્તાઽપ્યઘસાધનાય ગિરિજે લિઙ્ગાર્ચનારાધકો
યસ્તસ્યાનુચરોઽપિ સોઽપિ હિ મહાન્ કાલાદ્ભયં તસ્ય ન ॥ ૮૧॥

તજ્જન્માતિમનોહરં સુખકરં મન્યેઽતિમાન્યે શિવે
યઃ સાયં શિવપૂજનોદ્યતમતિર્મધ્યાહ્નકાલે શિવે ।
યં દૃષ્ટ્વાઽપિ યમાદયોઽપિ બહુધા કમ્પાયમાનાઃ સદા
ધન્યા તજ્જનની પિતા ચ સુતરાં ધન્યઃ સ માન્યઃ સુરૈઃ ॥ ૮૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે પ્રદોષકાલેશિવલિઙ્ગપૂજાવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૪ - પ્રદોષપૂજાદર્શનફલવર્ણનમ્ । ૫૨-૮૨॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 4 - pradoShapUjAdarshanaphalavarNanam . 52-82..

(Note: from text it seems it is spoken by Yagnyavalkya, but the content suggests that it is spoken to Devi by Shiva (Ishwara).)

Proofread by Ruma Dewan

*Pradoshakaleshivalingapujavarnanam*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*